निशुम्भशुम्भयोर्देवी भद्रकाली तरस्विनी ॥")
गरुड़े वायौ च पुं । इति राजनिर्घण्टः ॥

तरान्धुः, पुं, (तराय तरणाय तरे तरणे वा अन्धुरिव अतिगभीरमध्यदेशत्वात् तथात्वम् ।) नौकाविशेषः । भड़ इति भाषा । तत्पर्य्यायः । छोड़ः २ वहनम् ३ वार्व्वटः ४ वहित्रम् ५ । इति त्रिकाण्डशेषः ॥

तरालुः, पुं, (तराय तरणार्थं अलति पर्य्याप्नोतीति । अल+उन् ।) नौकाविशेषः । इति हारावली ॥

तरिः, स्त्री, (तरत्यनया इति । तॄ+"अच इः ।" उणां । ४ । १३८ । इति इः ।) नौका । इत्यमरः । १।१०।१० ॥ (यथा, महाभारते । १ । १०० । ४८ ।
"साब्रवीद्दाशकन्यास्मि धर्म्मार्थं वाहये तरिम् ॥")
दशा । वस्त्रादिपेटकः । इति हेमचन्द्रः ॥

तरिकः, पुं, (तराय तरणाय हितः । तॄ+ठन् ।) प्लवः । इति त्रिकाण्डशेषः ॥ (तरणे तरण-निमित्तकदेयशुल्केऽधिकारोऽस्त्यस्य । तरण-शुल्कग्रहणाधिकारी । यथा, याज्ञवल्क्ये । २ । २६६ ।
"तरिकः स्थलजं शुल्कं गृह्णन् दाप्यः पणान् [दश ॥")

तरिका, स्त्री, (तरिक+टाप् ।) नौका । इति शब्दरत्नावली ॥

तरिणी, स्त्री, (तरस्तरणं कृत्यत्वेनास्त्यस्याः इति इनिः ङीप् च ।) नौका । इति हेमचन्द्रः ॥

तरिता, स्त्री, (तर+इतच् ।) तर्ज्जनी । इति शब्दचन्द्रिका ॥ शृङ्गनम् । गाँजा इति भाषा । यथा, कुलार्णवतन्त्रे ।
"सम्बिदा कालकूटञ्च ताम्रकूटञ्च धुस्तुरम् ।
अहिफेनं खर्ज्जुरसस्तारिका तरिता तथा ॥"

तरिरथः, पुं, (तरेर्नौकाया रथ इव तत्परि-चालनात्तथात्वम् ।) अरित्रम् । इति हारावली ॥

तरीः, स्त्री, (तरत्यनया इति । तॄ+"अवितॄस्तृ-तन्त्रिभ्य ईः ।"उणां । ३ । १५८ । इति ईः ।) नौका । (यथा, माघे । ३ । ७६ ।
"तरीषु तत्रत्यमफल्गुभाण्डम् ॥")
गदा । वस्त्रादिपेटकः । इत्युणादिकोषः ॥ धूमः । इति त्रिकाण्डशेषः ॥ द्रोणी । इति जटाधरः ॥ दशा । इति मेदिनी । रे, ४० ॥

तरीषः, पुं, (तॄ+"कॄतॄभ्यामीषन् ।" उणां ।४। २६ । इति ईषन् ।) शोभनाकारः । भेलः । व्यवसायः । इत्युणादिकोषः ॥ समुद्रः । समर्थः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ स्वर्गः । इति मेदिनी । षे, ३७ ॥

तरीषी, स्त्री, (तरीष+संज्ञायां ङीष् ।) इन्द्र-कन्या । इति मेदिनी । षे, ३८ ॥

तरुः, पुं, (तरति समुद्रादिकमनेनेति । तॄ+ "भृमृशीतॄचरीति ।" उणां । १ । ७ । इति उः ।) वृक्षः । इत्यमरः । २ । ४ । ५ ॥ (यथा, रघुः । ३ । ७० ।
"मुनिवनतरुच्छायां देव्या तया सह शिश्रिये ॥")

तरुकूणिः, पुं, (तरौ वृक्षे कूणयतीति । कूण+ इन् ।) वागगुदपक्षी । इति त्रिकाण्डशेषः ॥

तरुजीवनं, क्ली, (तरोर्जीवनं जीवनकारणम् ।) वृक्षमूलम् । इति शब्दचन्द्रिका ॥

तरुणं, क्ली, (तॄ+"त्रो रश्च लो वा ।" उणां ।३ । ५४ । इति उनन् ।) कुब्जपुष्पम् । इति मेदिनी । णे, ४६ ॥

तरुणः, पुं, (तॄ+उनन् ।) स्थूलजीरकः । एरण्डः । इति राजनिर्घण्टः ॥

तरुणः, त्रि, (तरति प्लवते प्रमोदसलिले इति । तॄ+"त्रो रश्च लो वा ।" उणां । ३ । ५४ । इति उनन् ।) युवा । इति मेदिनी । णे, ४६ । (यथा, महाभारते । १ । ४० । २६ ।
"तरुणस्तस्य पुत्त्रोऽभूत्तिग्मतेजा महातपाः ॥")
नूतनः । इति धरणिः ॥ (यथा, छन्दोमञ्जर्य्याम् ।
"तरुणं सर्षपशाकं नवौदनं पिच्छिलानि दधीनि ।
स्वल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥")

तरुणज्वरः, पुं, (तरुणश्चासौ ज्वरश्चेति ।) सप्ता-हावधिज्वरः । (यथा, चक्रदत्तः ।
"आसप्तरात्रं तरुणं ज्वरमाहुर्म्मनीषिणः ॥"

तरुणदधि, क्ली, (तरुणं तरुणलक्षणोक्तं दधीति ।) पञ्चदिनातीतदधि । इति वैद्यकम् ॥
"शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥"
इति चाणक्ये । ६४ ॥

तरुणी, स्त्री, (तरुण+गौरादित्वात् ङीष् ।) द्वितीयवयाः स्त्री । (यथा,—
"ततस्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरावधि ।
निदाघशरदोर्बाला हिता विषयिणी मता ॥
तरुणी शीतसमये ॥"
'नित्यम्बाला सेव्यमाना नित्यं वर्द्धयते बलम् ।
तरुणी ह्रासयेच्छक्तिम् ॥"
"वृद्धोऽपि तरुणीं गत्वा तरुणत्वमवाप्नुयात् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
भूयोभूयः प्रवर्त्तमानरजाः स्त्री । इत्यमरटीका-सारसुन्दरी ॥ तत्पर्य्यायः । युवती २ । इत्य-मरः । २ । ६ । ८ ॥ तलुनी ३ युवतिः ४ । इति भरतः ॥ यूनी ५ दिक्करी ६ धनिका ७ धनीका ८ । इति शब्दरत्नावली ॥ गृहकन्या । दन्तीवृक्षः । चीड़ानामगन्धद्रव्यम् । पुष्पविशेषः । सेउती इति भाषा ॥ तत्पर्य्यायः । सहा २ कुमारी३ गन्धाढ्या ४ चारुकेशरा ५ भृङ्गेष्टा ६ रामतरुणी ७ सुदला ८ बहुपत्त्रिका ९ भृङ्ग-वल्लभा १० । इति राजनिर्घण्टः ॥ सेवती ११ । यथा, नारसिंहपुराणे ।
"चम्पकात् पुष्पशतकादशोकं पुष्पमुत्तमम् ।
अशोकात् पुष्पसाहस्रात् सेवतीपुष्पमुत्तमम् ।
सेवतीपुष्पसाहस्रात् कुब्जकं पुष्पमुत्तमम् ॥"
(यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"शतपत्त्री तरुण्युक्ता कर्णिका चारुकेशरा ।
महाकुमारी गन्धाढ्या लाक्षाख्यातिमञ्जुला ॥"
अस्या गुणाः । शिशिरत्वम् । स्निग्धत्वम् । पित्तदाहज्वरमुखपाकतृष्णाविच्छर्द्दिनाशित्वम् । मधुरत्वञ्च । इति राजनिर्घण्टः ॥

तरुणीकटाक्षमालः, पुं, (तरुणीनां कटाक्षाणां माला यत्र ।) तिलकवृक्षः । इति राजनिर्घण्टः ॥

तरुतूलिका, स्त्री, (तरुस्थिता तूलिका चित्रशलाका इव । यद्वा, तरौ वृक्षे दोलयतीति । दुल क्षेपे +ण्वुल् । टापि अत इत्वम् । पृषोदरादित्वात् साधुः ।) वातुलिः । इति हारावली ॥ वाडुड़ इति भाषा ॥ तरुदूलिकापि पाठः ॥

तरुनखः, पुं, (तरौ तरोर्वा नख इव ।) कण्टकः । इति हारावली ॥

तरुभुक्, [ज्] पुं, (तरुं भुनक्तीव । भुज+ क्विप् ।) वन्दाकः । इति राजनिर्घण्टः ॥

तरुमृगः, पुं, (तरौ तिष्ठन् मृग इव । शाक-पार्थिववत् मध्यपदलोपी समासः । यद्वा, तरु प्रियो मृगः पशुः ।) वानरः । इति शब्दरत्ना-वली ॥

तरुरागं, क्ली, (तरो रागा रक्तमाभा यस्मात् ।) किशलयम् । नूतनपल्लवः । इति हारावली ॥

तरुराजः, पुं, (तरूणां राजा अत्युच्चत्वादस्य तथा-त्वम् । समासे टच् ।) तालवृक्षः । इति राज-निर्घण्टः ॥ (सर्व्वपूज्यत्वात् स्वर्लोकभोग्यत्वाच्च पारिजातपुष्पवृक्षः । यथा, हरिवंशे ।१२४।५५।
"यदेतदाहृतं स्वर्गात् तत् त्वदर्थं मया विभो ! ।
देवोपभोग्यमेतद्धि तरुराजसमुद्भवम् ॥")

तरुरुहा, स्त्री, (तरौ रोहतीति । रुह+कः । टाप् ।) वन्दाकः । इति राजनिर्घण्टः ॥

तरुरोहिणी, स्त्री, (तरुषु रोहतीति । रुह+ णिनिः+ङीप् ।) वन्दाकः । इति राजनिर्घण्टः ॥

तरुवल्ली, स्त्री, (तरुषु वल्लीव तरुर्वल्लीव वा ।) जतुकालता । इति राजनिर्घण्टः ॥

तरुशायी, [न्] पुं, (तरौ तरुकोटरे शाखायां वा शेते इति । शी+णिनिः ।) पक्षी । इति हारावली ॥

तरुसारः, पुं, (तरोः सारः ।) कर्पूरः । इति हारावली ॥ (यथा, सुश्रुते चिकित्सित-स्थाने ३५ अध्याये । "तत्रनेत्राणि सुवर्णरजत-ताम्रायोरीतिदन्तशृङ्गमणितरुसारमयानि शुचीनीति ॥"कर्पूरशब्दोऽस्य विवृतिर्ज्ञातव्या ॥)

तरुस्था, स्त्री, (तरौ तिष्ठतीति । स्था+कटाप् च ।) वन्दाकः । इति राजनिर्घण्टः ॥

तरूटः, पुं, (तरोः जट इव ।) उत्पलकन्दः । अस्य गुणाः । गुरुत्वम् । विष्टम्भित्वम् । शीतल-त्वञ्च । इति राजवल्लभः ॥ (यथा, चरके सूत्र-स्थाने सप्तविंशेऽध्याये ।
"तरूटविसशालूकक्रौञ्चादनकशेरुकम् ।
शृङ्गाटकं कलोड्यञ्च गुरुविष्टम्भि शीतलम् ॥")

तर्क, क दीप्तौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) क, तर्कयति । वितर्कणेऽप्ययम् । (अत्र सकं ।) तर्कयत्यन्यगुणं सुधीः । इति दुर्गादासः ॥